संस्कतवार्ता:

दिनाङ्क :- 03.06.2025

प्रात: - 06:55

प्रधानमन्त्री-आई.ए.टी.ए.

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्-भारतं अन्तरिक्ष-विमाननक्षेत्रे वैश्विकनेतृत्वेन उद्भवति। मोदी नवदिल्ल्यां विश्ववायुपरिवहनसङ्घस्य शिखरसम्मेलनं सम्बोधितवान्। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् अन्तरिक्ष-विमाननक्षेत्रे भारतं वैश्विक- नेतृत्वेन उद्भवति। नवदिल्ल्याः भारतमण्डपम् इत्यत्र अन्ताराष्ट्रीय-वायुपरिवहन-सङ्घस्य-IATA इत्यस्य ८१ एकाशीतितमे वार्षिकोत्सवे सामान्यसभायां मोदी सम्बोधितवान्। प्रधानमन्त्रिणा वैश्विकविमानव्यवस्थायां विशालविपणेन सह नीतिनेतृत्वस्य, नवीनतायाः, समावेशीवृद्धेः च प्रतीकत्वेन भारतस्य भूमिकायाः उपरि बलं दत्तम्।

अद्य भारतं पूर्वस्मात् अपि अधिकं आत्मविश्वासेन आपूरितम् अस्ति। मोदी अवदत् यत् एताभिः विशेषताभिः भारतं स्वस्य विमाननक्षेत्रं अभूतपूर्वां ऊर्ध्वतां प्राप्तुं सन्नद्धं अस्ति। अस्मिन् शिखरसम्मेलने भवद्भिः कृताः चर्चाः वैश्विकविमानयानस्य कृते नूतना दिशां दास्यन्ति।

परागवे-राष्ट्रपति यात्रा

भारत-परागवे-देशौ स्वच्छ-ऊर्जा, हरित-हाइड्रोजन, जैवेन्धनम् इत्यादिषु अनेकक्षेत्रेषु सम्बन्धं अधिकं सुदृढं करिष्यतः। भारत-परागवे-देशौ स्वच्छ-ऊर्जा इति, हरित-हाइड्रोजन इति, जैव-इन्धनम् इत्यादिषु च क्षेत्रेषु स्वसम्बन्धं अधिकं सुदृढं कर्तुं निर्णयं कृतवन्तौ।

नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी पैराग्वेदेशस्य राष्ट्रपति: सैन्टियागो-पेना-पलासिओस: च प्रतिनिधिमण्डलस्तरस्य वार्तायां एतं निर्णयम् कृतवन्तौ। आतङ्कवादस्य विरोधे युद्धे उभौ देशौ एकत्रितौ स्तः इति प्रधानमन्त्री मोदी उक्तवान्। व्यापारसम्बन्धं वर्धयितुं अपि अनेकाः सम्भावना: वर्तन्ते इति सः अवदत्।

राष्ट्रपति:

राष्ट्रपति: द्रौपदी मुर्मु: पैराग्वेदेशस्य राष्ट्रपते: सैन्टियागो पेना-पालासिओसस्य राष्ट्रपति भवने स्वागतं कृतवती। तस्य सम्माने भेजनम् आयोजितवती। राष्ट्रपति: जनसम्पर्कपटले उक्वती यत उभौ देशौ उभयो: देशयो: मूल्यानां वैश्विक-महत्त्वानां वैचारिक-समानतानाम् आधारेण उभौ संबंधं सुदृढीकर्तुम् सहमतौ।

आंध्र प्रदेश

आंध्र-प्रदेश-प्रशासनस्य रियल-टाइम-गवर्नेंस-सोसायटीति भारतीय-अन्तरिक्ष-अनुसन्धान-संघटनस्य श्रीहरिकोटा रेंज इति च गतदिने आंध्रप्रदेशे रियल-टाइम-नागरिक-केन्द्रित-शासनाय अन्तरिक्ष प्रविधे: पञ्चवर्षस्य सन्धि-ज्ञापने हस्ताक्षरं कृतवती।

अमितशाह: खाद्यान

गृहमन्त्री अमितशाहः नवदिल्ल्यां विश्वस्य बृहत्तमायाः सहकारीखाद्यधान्यभण्डारणयोजनायाः समीक्षासभां कृतवान्। शाह: अवदत् यत् खाद्यधान्यसञ्चययोजना प्रधानमन्त्रिणः नरेन्द्रमोदिनः सहकार्यद्वारा समृद्धेः स्वप्नस्य साकारीकरणस्य दिशि एकः बृहत् प्रयासः अस्ति।

असम जलौघ:

असम-प्रदेशे जलौघस्थितिः गभीरा वर्तते, राज्यस्य अनेकेषु भागेषु जलस्तरः वर्धितः। सप्तदश मण्डलेषु प्रायः चतुर्लक्षजनाः जलौघेन प्रभाविताः सन्ति। मुख्यमन्त्री हिमन्तबिस्वसरमा अद्य लखीमपुरमण्डलस्य भ्रमणं कृत्वा जलौघस्य स्थितिं निरीक्षितवान्।

वियतनाम-श्रद्धालु:

भगवत: बुद्धस्य पवित्रावशेषस्य दर्शनाय ऐतिहासिक-राष्ट्रव्यापिन्यां उपासनायाम् भारतात् प्रेषिता: अष्टसप्ततिलक्षोत्तरैककोटिश्रद्धालव: वियतनामं सम्प्राप्तवान्त:।

नीट

सर्वोच्चन्यायालयस्य आदेशानुसारं राष्ट्रियपरीक्षामण्डलेन चिकित्साविज्ञानस्य NEET PG परीक्षा स्थगिता।

।। इति वार्ता:।।